1 2 3 4 a 5
Eternal, everlasting 5. सनातनं ध्रुवं नित्यं शाश्वतं स्यादनश्वरम् ।
1 2 3 4 5
Righteousness, virtue 5. धर्मः पुण्यं वृषः श्रेयः सुकृतं च समं स्मृतम् ॥१२५॥
b 1
इष्टानिष्टफलं प्राज्ञैः स्मृतं दैवमयानयम् । Good luck, bad luck.
1 2 3 4
Fate, luck, destiny 4 भागधेयं तथा भाग्यं विपाको भवितव्यता ॥१२६॥
1 2 3 4 5
A portent, foreboding evil omen, even omen 7. उपलिङ्गमरिष्टं स्यादुपसर्ग उपद्रवस्तथोत्पातः ।
6 7 1 2 c 3
ईतिरजन्यं च बुधैर्डमरो डिम्बश्च विप्लवः कथितः ॥१२७॥ A scuffle or turmoil 3.
1 2 3 1 2
Worship 3. अर्चा पूजा सपर्या स्यादुपहारो बलिः स्मृतः । Present, gift 2.
1 2 3
Deep or profound meditation 3. प्रणिधानं समाधानं समाधिश्च समास्त्रयः ॥१२८॥
1 2 3 d 4 5
Diligent service. वरिवस्या परिचर्या शुश्रूषोपासना परीष्टिः स्यात् ।
6 7 8 9 e 10 11
सेवा भक्तिरुपास्तिः प्रसादनाराधनोपचाराश्च ॥१२९॥
1 2 3 4 f 5
Reflection image 11. प्रतिबिम्बं प्रतिरूपं प्रतिमानं प्रतिकृतिं प्रतिच्छन्दम् ।
6 7 8 g 9
प्रतिकायं च प्रतिनिधिमाहुः प्रतियातनां प्रतिच्छायाम् ॥१३०॥
10 11 h 1
अर्चा तु प्रतिमा प्रोक्ता हरिणी स्याद्धिरण्मयी । A gold image 1.
1 2
Brass or iron image. अन्यलोहमयी प्राज्ञैः सूर्मी स्थूणा च कथ्यते ॥१३१॥
1 2 3 4 5
शुचिर्मेध्यं पवित्रं च पुण्यं पावनमुच्यते ।
6 7 8 9 10
विमलं विशदं वीध्रमुज्ज्वलं स्यादनाविलम् ॥१३२॥ Holy, pure 10.
1 2 3 4
The universe 4. भुवनं विष्टपं लोको जगदेकार्थवाचकाः ।
1 2 3 4 i
Ambrosia, nectar 4. अमृतं त्रिदशाहारः सुधा पीयूषमुच्यते ॥१३३॥
1 2 3 4 5
Life, creature 5. असवो जीवितं प्राणा जीवो जीवा च कथ्यते ।
1 2 3 1 2
The soul 3. क्षेत्रज्ञः पुरुषो ह्यात्मा संसारी चेतनो मतः ॥१३४॥ A sentient being 2.

a स्यादनुस्वरम्, स्यादनस्वरम् b देवभयानयम्, दैवभयायनम्, c डम्बश्च, डिम्भश्च d पासनं e प्रसाधना f प्रतिकृतं g प्रतियातना, प्रतिछायम् h हिरण्यी स्याद्धिरणायां i पीयूष उच्यते ।